# वचनं शीलमाख्याति

अथैकदा कश्चिद्राजा दण्डकारण्यं सपरिवारं मृगयार्थं गतवान् आसित्। वन्यसत्वम् अनुसरन् स राजा सहचरेभ्योऽमात्यादिभ्यो दूरम् अगच्छत्। ततस्ते सर्वे राजानम् अन्वेष्टुम् इतस्ततः अभ्रमन्। अरण्यमध्ये एकस्मिन् उटजे कश्चन् अन्ध साधुः न्यवसत्। राजानमन्वेष्टुं प्रधानामात्येन प्रेषितः कोऽपि सैनिकः तत्र प्राप्तः। वृक्षतल उपविष्टम् अन्धसाधुं दृष्ट्वा सगर्वम् अवदत् सः 'रे अन्ध ! अपि आगतः अस्माकं राजा अत्र ?' इति। तदाकर्ण्य साधुः उवाच 'अन्धः अहम्। न द्रष्टुं समर्थः अस्मि' इति। 'जाने त्वम् अन्धोऽसि। तथापि न बधिरः। अश्वस्य पदरवाः अपि न श्रुताः त्वया' इति सोत्प्रासम् उक्तं तेन। साधोः न इति प्रत्युत्तरं श्रुत्वा दुर्वचनानि भाषमाणः स निर्गतः तस्मात् स्थानात्।

अत्रान्तरे सेनापतिः तत्र उपस्थितः। 'भोः साधोः ! अप्यस्माकं नृपतिः आगतोऽत्र ?' इति पृष्टे सति 'न नृपतिरागतः, परम् एकः सैनिकः राजानम् अन्विष्यन् उत्तरां दिशम् अगच्छत्' इति उक्तवान् सः। ततश्च सेनापतिः अन्यत्र अन्वेषणार्थं निरगच्छत्। अनन्तरं स्वयं प्रधानामात्यः तत्र आगत्य रथात् अवतीर्य च सविनयं साधुम् अपृच्छत् "भोः साधुवर, वयं राज्ञा सह अस्मिन् दुर्गमवने मृगयार्थम् आगताः। परं दुर्भाग्येण अस्मत् वियुक्तः महाराजः। अपि जानाति भवान् किञ्चित् अस्मिन्विषये' ? 'भद्र न किमपि जानामि' इति श्रुत्वा प्रधानामात्योऽन्यत्र निरगच्छत्।

अथाल्पकालेन परिश्रान्तो राजा तत्र उपस्थितः, यत्र स साधुरुपविष्टः। कृताञ्जलिना भणितं राज्ञा 'भगवन्, तृषार्तः अहम्, किञ्चित् जलमिच्छामि पातुम्'। तदा स अवदत् 'राजन् स्वागतं ते। परिश्रान्तो लक्ष्यसे। अतो न सहसा जलं पेयम्। कन्दमूलफलानि भुक्त्वा जलप्राशनं कर्तव्यम्'। तदा सविस्मयं राज्ञा पृष्टम् 'ननु नेत्रहीनेन भवता अहं राजा इति कथं विज्ञातम्। कश्चिदागतोऽत्र माम् अन्वेष्टुम् ?' इति। तत् श्रुत्वा विहस्य अब्रवित् सः 'प्रथमं सैनिको भवन्तमन्वेष्टुम् आगतः। तत्पश्चात् सेनापतिः। तदनन्तरं प्रधानामात्यः। अधुना भवानत्र उपस्थितः' इति।

तदा राजा प्रपच्छ, 'तेषाम् अधिकारपदानि अपि कथम् अभिज्ञातानि'। साधुः प्रत्यवदत् 'तैः प्रयुक्तैः शब्दविशेषैः। सैनिकः मां 'रे अन्ध' इति सम्बोधितवान्। सेनापतिना 'भोः साधोः' इति उक्तम्। प्रधानामात्यः सादरं 'साधुवरः' इति अब्रवित्। भवता सप्रणामं 'भगवन्' इति गौरवपदं प्रयुक्तम्। राजन् आदरान्वितवचांसि शीलश्रेष्ठतां द्योतयन्ति' इति। तदाकर्ण्य संतुष्टो राजा 'धन्यः खलु भवान्, यः शब्दमात्रेण शीलं परीक्षते। इत्युक्त्वा तं मुनिवरं प्रणाम्य स्वनगरं प्रतिनिवृत्तः।